
# ॥ श्रीराम रक्षा स्तोत्रं ॥




गणेश भारतराव रासने

# वडिलांची इच्छा

श्रीज्ञानेश्वरीचे पारायण करताना वयोमानानुसार वडिलांना डोळ्यांचा त्रास होऊ लागला. तेव्हा त्यांच्यासाठी Tab वर सहज वाचता येईल अशी श्रीज्ञानेश्वरी शोधत असताना असे लक्षात आले की सुलभ, वाचनीय पारायण प्रत उपलब्ध नाही. आहेत त्या सर्व PDF मध्ये. आणि मराठी मध्ये 'text reflow' नसल्याने PDF वाचने अगदी किचकट, कटकटीचे आणि वेळखाऊ आहे. तेव्हा वडिलांसाठी EPUB मध्ये श्रीज्ञानेश्वरी संकलित करण्याचा निश्चय केला. यात एकच अवघड गोष्ट म्हणजे प्रत्येक शब्द, अक्षर अगदी शुद्ध हवे! नेटवर ठिकठिकाणी, अगदी लाखात, भरपुर वाङ्मय उपलब्ध आहे, पण अशुद्ध स्वरूपात. तेव्हा 'मोठ्या फॉंट व ईपब मध्ये' श्रीज्ञानेश्वरी तयार करण्यास साडेतीन महिने लागले! आणि वडिलांना हवे तसे आणि सहज पारायण करताना पाहून सर्व श्रमाचे चीज झाले!

ही कलाकृती सर्वांपर्यंत पोहोचावी व जास्तीत जास्त लोकांना याचा लाभ मिळावा या हेतूने ई साहित्य प्रतिष्ठानने याचे प्रकाशन केले.

नंतर वडिलांनी श्रीविष्णु सहस्र नामची इच्छा व्यक्त केली. तेव्हा विचार केला की जे जे वाङ्मय आपल्याला शक्य आहे ते ते सर्व यथाशक्ति 'मोठ्या फॉंट व ईपब मध्ये' संकलित करावे. याची श्रीराम रक्षा स्तोत्रा पासून सुरूवात करीत आहे. 'मोठ्या फॉंट व ईपब मध्ये' या मालिकेतील हे दुसरे पुस्तक, श्रीज्ञानेश्वरी हे पहिले. श्रीविष्णु सहस्र नाम व श्रीमत् भगवत् गीता या मालिकेतील पुढील पुस्तकं.

यथाशक्ति प्रत्येक अक्षर, शब्द शुद्ध असेल यासाठी सर्व प्रकारे प्रयत्न केला आहे. काही चूक असल्यास क्षमा करावी व कळवणे ही सर्वांना विनंती.

गणेश भारतराव रासने

rasganesh79@gmail.com +919924894503

॥ श्रीकृष्ण अर्पणम् अस्तु ॥

॥ श्रीः ॥

## ॥ श्रीराम रक्षा स्तोत्रम् ॥

श्री गणेशाय नमः ।

अस्य श्रीराम रक्षा स्तोत्र मन्त्रस्य ।

बुध कौशिक ऋषिः ।

श्रीसीता राम चन्द्रो देवता ।

अनुष्टुप छन्दः ।

सीता शक्तिः ।

श्रीमत् हनुमान् कीलकं ।

श्रीराम चन्द्र प्रीती अर्थे

राम रक्षा स्तोत्र जपे विनियोगः ।

॥ अथ ध्यानम् ॥

ध्यायेत् आजानु बाहुं
धृत शर धनुषं
बद्ध पद्म आसनस्थं ।
पीतं वासो वसानं
नव कमल दल
स्पर्धि नेत्रं प्रसन्नम् ।
वामाङ्क आरूढ सीता
मुख कमल मिलत्
लोचनं नीरद आभं ।
नाना अलङ्कार दीप्तं
दधतम् उरु जटा
मण्डलं राम चन्द्रम् ॥

॥ इति ध्यानम् ॥

चरितं रघु नाथस्य
शत कोटि प्र विस्तरम् ।
एक एकम् अक्षरं पुंसां
महा पातक नाशनम् ॥१॥

ध्यात्वा नील उत्पल श्यामं
रामं राजीव लोचनम् ।
जानकी लक्ष्मण उपेतं
जटा मुकुट मण्डितम् ॥२॥

सासितूण धनुर्बाण पाणिं

नक्तं चर अंतकम्।

स्व लीलया जगत् त्रातुम्

आविः भूतम् अजम् विभुम् ॥३॥

राम रक्षां पठेत् प्राज्ञः

पापघ्नीं सर्व कामदाम् ।

शिरो मे राघवः पातु

भालं दशरथ आत्मजः ॥४॥

कौसल्येयो दृशौ पातु
विश्वामित्र प्रियः श्रुतीः ।
घ्राणं पातु मख त्राता
मुखं सौमित्रि वत्सलः ॥५॥

जिह्वां विद्या निधिः पातु
कण्ठं भरत वन्दितः ।
स्कन्धौ दिव्य आयुधः पातु
भुजौ भग्नेश कार्मुकः ॥६॥

करौ सीता पतिः पातु

हृदयं जामदग्न्य जित् ।

मध्यं पातु खर ध्वंसी

नाभिं जाम्बवत् आश्रयः ॥७॥

सुग्रीव इशः कटी पातु

सक्थिनी हनुमत् प्रभुः ।

ऊरु रघु उत्तमः पातु

रक्षः कुल विनाश कृत् ॥८॥

जानुनी सेतु कृत् पातु
जंघे दशमुख अन्तकः ।
पादौ विभीषण श्रीदः पातु
रामः अखिलं वपुः ॥९॥


एतां रामबल उपेतां
रक्षां यः सुकृती पठेत् ।
स चिरायुः सुखी पुत्री
विजयी विनयी भवेत् ॥१०॥

पाताल भूतल व्योम
चारिणः छद्म चारिणः ।
न द्रष्टुम् अपि शक्ताः ते
रक्षितं राम नामभिः ॥११॥

रामेति रामभद्र इति
राम चन्द्र इति वा स्मरन् ।
नरो न लिप्यते पापैः
भुक्तिं मुक्तिं च विन्दति ॥१२॥

जगत् जेत्रा एक मन्त्रेण
राम नाम्ना अभि रक्षितम् ।
यः कण्ठे धारयेत् तस्य
करस्थाः सर्व सिद्धयः ॥१३॥

वज्र पञ्जर नाम इदं
यो राम कवचं स्मरेत् ।
अव्याहत आज्ञः सर्वत्र
लभते जय मङ्गलम् ॥१४॥




आदिष्टवान् यथा स्वप्ने
राम रक्षाम् इमां हरः ।
तथा लिखितवान् प्रातः
प्रबुद्धो बुध कौशिकः ॥१५॥

आरामः कल्प वृक्षाणां
विरामः सकल आपदाम् ।
अभि राम त्रिलोकानां रामः
श्रीमान् स नः प्रभुः ॥१६॥


तरुणौ रूप सम्पन्नौ
सुकुमारौ महाबलौ ।
पुण्डरीक विशाल अक्षौ
चीर कृष्ण अजिन अम्बरौ ॥१७॥

फलमूल अशिनौ दान्तौ
तापसौ ब्रह्म चारिणौ ।
पुत्रौ दश रथस्य एतौ
भ्रातरौ राम लक्ष्मणौ ॥१८॥



शरण्यौ सर्व सत्त्वानां
श्रेष्ठौ सर्व धनुष्मताम् ।
रक्षः कुल निहन्तारौ
त्रायेतां नो रघु उत्तमौ ॥१९॥

आत्त सज्ज धनुषौ इषुस्पृशौ
अक्षय आशुग निषङ्ग सङ्गिनौ ।
रक्षणाय मम राम लक्ष्मणौ अग्रतः
पथि सदैव गच्छताम् ॥२०॥



सन्नद्धः कवची खड्गी
चाप बाण धरो युवा ।
गच्छन् मनोरथो अस्माकं
रामः पातु स लक्ष्मणः ॥२१॥

रामो दाशरथिः शूरो
लक्ष्मण अनुचरो बली।
काकुत्स्थः पुरुषः पूर्णः
कौशल्येयो रघु उत्तमः ॥२२॥

वेदान्तेन वेद्यो यज्ञेशः
पुराण पुरुष उत्तमः ।
जानकी वल्लभः श्रीमान्
अप्रमेय पराक्रमः ॥२३॥

इति एतानि जपेत् नित्यं
मम भक्तः श्रद्धया अन्वितः ।
अश्वमेध अधिकं पुण्यं सम्
प्राप्नोति न संशयः ॥२४॥

रामं दूर्वादल श्यामं
पद्माक्षं पीत वाससम् ।
स्तुवन्ति नामभिः दिव्यैः
न ते संसारिणो नराः ॥२५॥



रामं लक्ष्मण पूर्वजं
रघुवरं सीतापतिं सुन्दरं
काकुत्स्थं करुणा अर्णवं
गुण निधिं विप्र प्रियं धार्मिकम् ।
राजेन्द्रं सत्य सन्धं दशरथ तनयं
श्यामलं शान्ता मूर्ति
वन्दे लोक अभिरामं
रघुकुल तिलकं राघवं रावण अरिम् ॥२६॥



रामाय राम भद्राय
राम चन्द्राय वेधसे ।
रघु नाथाय नाथाय
सीतायाः पतये नमः ॥२७॥

श्रीराम राम रघु नन्दन राम राम
श्रीराम राम भरत आग्रज राम राम ।
श्रीराम राम रण कर्कश राम राम
श्रीराम राम शरणं भव राम राम ॥२८॥

श्रीराम चन्द्र चरणौ मनसा स्मरामि
श्रीराम चन्द्र चरणौ वचसा गृणामि ।
श्रीराम चन्द्र चरणौ शिरसा नमामि
श्रीराम चन्द्र चरणौ शरणं प्रपद्ये ॥२९॥

माता रामो मत् पिता राम चन्द्रः
स्वामी रामो मत् सखा राम चन्द्रः ।
सर्वस्वं मे राम चन्द्रो दयालु
न अन्यं जाने नैव जाने न जाने ॥३०॥

दक्षिणे लक्ष्मणो यस्य
वामे च जनक आत्मजा ।
पुरतो मारुति यस्य
तं वन्दे रघु नन्दनम् ॥३१॥

लोक अभिरामं रण रङ्ग धीरं
राजीव नेत्रं रघु वंश नाथम् ।
कारुण्य रूपं करुणा करं तं
श्रीराम चन्द्रं शरणं प्रपद्ये ॥३२॥

मनोजवं मारुत तुल्य वेगं
जित इन्द्रियं बुद्धि मतां वरिष्ठम् ।
वात आत्मजं वानर यूथ मुख्यं
श्रीराम दूतं शरणं प्रपद्ये ॥३३॥



कूजन्तं राम राम इति
मधुरं मधुर अक्षरम् ।
आरुह्य कविता शाखां
वन्दे वाल्मीकि कोकिलम् ॥३४॥



आपदाम् अपहर्तारं
दातारं सर्व सम्पदां ।
लोक अभिरामं श्रीरामं
भूयो भूयो नमामि अहम् ॥३५॥

भर्जनं भव बीजानाम्
अर्जनं सुख सम्पदाम् ।
तर्जनं यम दूतानां
राम राम इति गर्जनम् ॥३६॥

रामो राज मणिः सदा विजयते
राम रमेशं भजे
रामेण अभिहता निशाचर चमू
रामाय तस्मै नमः ।
रामात् नास्ति परायणं परतरं
रामस्य दासो अस्मि अहं
रामे चित्तस्य लयः सदा भवतु मे
भो राम माम् उद्धर ॥३७॥



राम राम इति राम इति
रमे रामे मनोरमे।
सहस्र नाम तेन् तुल्यं
रामनाम वरानने ॥३८॥

॥ इति श्री बुध कौशिक मुनि विरचितं
श्रीराम रक्षा स्तोत्रं संपूर्णम् ॥

